শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

সরলকৱি শ্রীরাঘৱাচার্য কৃতা

# ॥শ্রী মহালক্ষ্মী প্রপত্তিঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
# ॥শ্রী মহালক্ষ্মী প্রপত্তিঃ ॥

ভৱাংভোধৌ মজ্জতাং মাদৃশানাং
    প্রণম্রাণাং রক্ষণে সানুকম্পাম্।
স্বভর্তারং সস্মিতং চোদযন্তীং
    মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ১ ॥

সমাম্নাযৈর্গীযমানানুভাৱাং
    গুণৈস্সর্ৱৈর্ভাসমানাং শুভাঙ্গীম্।
কৃপাৱৃষ্টিং তন্বতীমাশ্রিতৌঘে
    মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ২ ॥

মুনীনাং হৃতপঙ্কজে রাজহংসীং
    সুরৈর্নিত্যং পূজ্যমানাঙঘ্রিপদ্মাম্।
হরের্ৱক্ষস্যাত্তৱাসাং প্রহৃষ্টাং
    মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ৩ ॥

স্বসংস্মৃত্যা শোষিতাশেষপাপাং
    সদাশ্লেষাত্তোষিতাম্ভেশচিত্তাম্।
নমদ্বর্গে ৱাতসলীং সংদুহানাং
    মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ৪ ॥

পুরা দেৱৈর্মথ্যমানে সুধার্থং
    পযঃপূরে দুগ্ধসিন্ধোরুদীতাম্।
দিশস্সর্ৱা ভাসযন্তীং স্বদীপ্ত্যা
    মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ৫ ॥

সুরৱ্রাতে প্রেক্ষমাণে সমস্তে
    ৱিশন্তীং হৈ ৱিষ্ণুৱক্ষো ৱিশালম্।
হরের্ৱক্তুং সস্পৃহং ৱীক্ষমাণাং
    মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ৬ ॥

www.prapatti.com

স্বযাভাসা সর্ৱতো ভাসযন্তীম্
ইহোঙ্কারক্ষেত্র আৱির্ৱিভূতাম্।
দযাপূরৈর্ৱিশ্বমাপ্যাযযন্তীং
মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ৭ ॥

সতন্ত্রাতুং প্রাপ্তনানাৱতারে
নিজে পত্যৌ স্বীকৃতানেকরূপাম্।
সখীভাৱাদৈকমত্যং দধানাং
মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ৮ ॥

ৱিহারার্থং কোমলে শেষভোগে
সতাং চিত্তে নির্মলে ৱৈদমৌলৌ।
সমং পত্যা মাতরং তাং শযানাং
মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ৯ ॥

ইযং ৱাণী স্তাৱিকা ত্বদ্বিভূতে-
র্ভৱানীযং চামরগ্রাহিণীতি।
ৱচোভঙ্গীং শৃণ্ৱতীং কিঙ্করীণাং
মহালক্ষ্মীং ত্বাং শরণ্যাং প্রপদ্যে॥ ১০ ॥

লক্ষ্মীপ্রপত্তিমেতাং কৱিনা সরলেন রাঘৱেণোক্তাম্।
যঃ পঠতি তস্য কামাঃ লক্ষ্ম্যাঃ কৃপযা তদৈৱ সিধ্যন্তি॥ ১১ ॥

॥ ইতি শ্রী মহালক্ষ্মী প্রপত্তিঃ সমাপ্তঃ ॥

www.prapatti.com